25E/24E
100 Marks

टिळक महाराष्ट्र विद्यापीठ, पुणे

संस्कृत पारंगत (एम.ए.) बहिःस्थ

परीक्षा: मे – २०२६

सत्र २ रे

विषय: साहित्य-२ (मुद्राराक्षस) (25E/24E3208)

दिनांक: २५/०५/२०२६ **गुण : १००** **वेळ : स. १०.०० ते १.००**

सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

प्र. १. चतुर्णां श्लोकानां स्वभाषया अनुवादं कुरुत । **(२४)**

१. समुत्खाता नन्दा नव हृदयशल्या इव भुवः कृता मौर्य लक्ष्मीः सरसि नलिनीव स्थिरपदा।
द्वयोः सारं तुल्यं द्वितयमभियुक्तेन मनसा फलं कोपप्रीर्द्विषति च विभक्तं सुहृदि च।।

२. नेदं विस्मृतभक्तिना न विषयव्यासङ्गरुढात्मना प्राणप्रच्युतिभीरुणा न च मया नात्मप्रतिष्ठार्थिना।
अत्यर्थं परदास्यमेत्य निपुणं नीतौ मनो दीयते देवः स्वर्गगतोऽपि शात्रववधेनाराधितः स्यादिति।।

३. नन्दैर्वियुक्तमनपेक्षितराजवृत्तैरध्यासितं च वृषलेन वृषेण राज्ञाम्।
सिंहासनं सदृशपार्थिवसंगतं च प्रीतिं परां प्रगुणयन्ति गुणा ममैते।।

४. उद्यच्छता धुरमकापुरुषानुरुपां गन्तव्यमाजिनिधनेन पितुः पथा वा।
आच्छिद्य वा स्वजननीजनलोचनेभ्यो नेयो मया रिपुवधूनयनानि बाष्पः।।

५. भक्त्या नन्दकुलांनुरागदृढया नन्दान्वयालम्बिना किं चाणक्यनिराकृतेन कृतिना मौर्येण संधास्यते।
स्थैर्यं भक्तिगुणस्य वाधिगणयन् किं सत्यसंधो भवे-दित्यारुढकुलालचक्रमिव मे चेतश्चिरं भ्राम्यति।।

६. जयति जलदनीलः केशवः केशिघाती जयति च जनदृष्टिचन्द्रमाश्चन्द्रगुप्तः।
जयति जयनकार्यं यावत्कृत्वा सर्वं प्रतिहतपरक्षार्यचाणक्यनीतिः।।

प्र.२. पञ्च वाक्यानि ससन्दर्भं स्पष्टयत । **(२५)**

१. तेन यमेन जीवामः।
२. निर्वाहः प्रतिपन्नवस्तुषु।
३. जागर्ति खलु कौटिल्यः।
४. अयमपरो गण्डस्योपरि स्फोटः।
५. ये मुहूर्तमात्रकटुकं पश्चात्पथ्यमुपदिशन्ति।
६. निचीयते त्वया साधो यशोऽपि सुहृदा विना।
७. पुत्र चाणक्यविरहिते देशे वस्तव्यम्।

प्र. ३. द्वौ सविस्तरं लिखत । **(३०)**

१. 'मुद्राप्राप्तिः' इति प्रथमाङ्कस्य रसग्रहणं कुरुत।
२. 'मुद्राराक्षसम्' इति नाटकस्य नायकः कः?
३. विशाखदत्तस्य कालम् ऐतिह्यं च लिखत।

प्र.४. टिप्पण्यौ लिखत। **(१६)**

१. मुद्राराक्षसस्य नान्दी।
२. चन्दनदासः।
३. निपुणकः।

प्र.५. सनाम समासविग्रहं कुरुत।(केवलं पञ्च) **(०५)**

१. शशलाञ्छनस्य २. नानाव्यञ्जनाः ३. रिपुपक्षः
४. पुष्पपुरनिवासी ५. अनभिव्यक्तम् ६. राक्षसकलत्रम्
७. रात्रिंदिवं ८. सनिकारम्